# वन्दना



जय जय हे भगवति सुरभारति
तव चरणौ प्रणमामः।
नादब्रह्ममयि जय वागीश्वरि
शरणं ते गच्छामः ।। जय ।।
त्वमसि शरण्या त्रिभुवनधन्या
सुर-मुनि-वन्दितचरणा ।
नवरस-मधुरा-कविता-मुखरा
स्मित-रुचि-रुचिराभरणा ।। जय ॥
आसीना भव मानसहंसे
कुन्द-तुहिन-शशि-धवले ।
हर जडतां कुरु बोधि विकासं
सित-पङ्कज-तनु-विमले ।। जय ।।

ललितकलामयि ज्ञान-विभामयि
वीणा-पुस्तक-धारिणि।
मतिरास्तां नो तव पद-कमले
अयि कुण्ठाविषहारिणि ॥ जय ।।

## टिप्पणी

**सुरभारतिहे** વાણીની દેવી **वागीश्वरी** વાણીની દેવી **आसीना** બેઠેલી **कुन्द** મોગરાનું ફૂલ **तुहिनः** બરફ **शशिधवला** ચંદ્ર જેવી સફેદ **पङ्कजम्** કમળ **तनु** શરીર **मतिः** બુદ્ધિ **आस्ताम्** - થાઓ.

## विशेषः

**मतिरास्ताम्** मतिः आस्ताम्

## भवान् जानाति किम् ?

- मासे पक्षद्वयं भवति - शुक्लपक्षः, कृष्णपक्षः च।
- सर्पस्य जिह्वाद्वयं भवति ।
- त्रयः गुणाः सन्ति - सत्त्व, रजः, तमः च ।
- चत्वारः आश्रमाः सन्ति - ब्रह्मचर्यम्, गार्हस्थ्यम्, वानप्रस्थम्, संन्यासः च।
- चत्वारः पुरुषार्थाः सन्ति - धर्मः, अर्थः, कामः, मोक्षः च।